२९

कूर्मो गार्त्समदो, गृत्समदो वा। विश्वेदेवाः। त्रिष्टुप्

**धृत॑व्रता॒ आदि॑त्या॒ इषि॑रा आ॒रे मत्क॑र्त रह॒सूरि॒वागः॑।**
**शृ॒ण्व॒तो वो॒ वरु॑ण॒ मित्र॒ देवा॑ भ॒द्रस्य॑ वि॒द्वाँ अव॑से हुवे वः॥ २.०२९.०१**

धृतव्रताः- धृतधर्माः। आदित्याः- अखण्डप्रकृतिजाः। इषिराः- सङ्कल्पजा हे देवाः। रहसूरिव- रहस्यप्रदेश इव। मत्- मत्तः। आरे- दूरे। आगः- अघम्। कर्त- कुरुत। वरुण- ऋताधिदैवत। मित्र- स्नेहाधिदैवत। देवाः- हे देवताः। भद्रस्य विद्वान्- क्षेमस्य ज्ञाता सन्। अवसे- रक्षायै। वः- युष्माकं। शृण्वतः- मया कृतं स्तोत्रं जानतः। वः- युष्मान्। हुवे- आह्वये ॥१ ॥

**यू॒यं दे॑वा॒ः प्रम॑तिर्यू॒यमोजो॑ यू॒यं द्वेषां॑सि सनु॒तर्यु॑योत।**
**अ॒भि॒क्ष॒त्तारो॑ अ॒भि च॒ क्षम॑ध्वम॒द्या च॑ नो मृ॒ळय॑ताप॒रं च॑॥ २.०२९.०२**

देवाः- हे देवताः। यूयम्। प्रमतिः- प्रकर्षमननसाधनम्। यूयम्। ओजः- तेजः। यूयम्। द्वेषांसि- द्वेषभावनानि। सनुतः- अन्तर्हिते देशे। युयोत- पृथक्कुरुत। अभिक्षत्तारः- क्षत्रियाः। अभि- आभिमुख्येन। क्षमध्वम्- सहनशीला भवत। च। अद्य- अस्मिन् दिने। अपरं च- अपरस्मिन्दिने च। नः- अस्मान्। मृळय- आनन्दयत ॥२ ॥

**किमू॒ नु वः॑ कृणवा॒माप॑रेण॒ किं सने॑न वसव॒ आप्ये॑न।**
**यू॒यं नो॑ मित्रावरुणादिते च स्व॒स्तिमि॑न्द्रामरुतो दधात॥ २.०२९.०३**

वसवः- हे शरण्याः। किमु- किं खलु। वः- युष्मदर्थम्। कृणवाम- करवाम। अपरेण- भवदन्येन। सनेन- सम्भजनेन। किम्। आप्येन- भवदपरेण वा शरण्येन किम्। मित्रावरुणा- स्नेहाधिदैवत ऋताधिदैवत। अदिते- अखण्डप्रकृतिज। इन्द्रामरुतः- हे ईशनाधिदैवत। हे प्राणाः। यूयम्। नः- अस्मदर्थम्। स्वस्तिम्- भद्रम्। दधात- धारयत ॥३ ॥

Dr. Rangaji
WEBOLIM

**हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम्।**
**मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म॥ २.०२९.०४**

हये- हे। देवाः। यूयम्। इत्- एव। आपयः- प्राप्तव्याः। स्थ- भवथ। ते- तादृशा यूयम्। नाधमानाय- प्रार्थयते। मह्यम्- मे। मृळत- आनन्दं कुरुत। वः- युष्माकम्। रथः- रथम्। मध्यमवाट्- मध्यमवाहनम्। विभक्तिव्यत्ययः। ऋते- विना। मा भूत्- मा भवतु। सदा मध्यमवाडेव भवतु न द्रुतगतिर्न मन्दो भवत्विति भावः। युष्मावत्सु- युष्मत्सदृशेषु। आपिषु- बन्धुषु सत्सु। मा श्रमिष्म- श्रान्ता मा भूम ॥४॥

**प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशास।**
**आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट॥ २.०२९.०५**

वः- युष्माकम्। एकः- एकोऽहम्। भूरि- प्रभूतम्। आगः- अघम्। मिमय- हिंसितवान्। अकरवम्। अघं हिंसैव। यत्- तस्मादेव। पिता- जनकः। कितवम्- कुपथगमनं पुत्रमिव। शशास- अनुशासनं कृतवन्तः। पाशाः। आरे- दूरे सन्तु। अघानि- पापानि। आरे- दूरे सन्तु। पुत्रे अधि- पुत्रमिव स्थितं मां पितरः सन्तः। विभक्तिव्यत्ययः। विमिव- अपगतमिव। वातीति विः। मा ग्रभीष्ट- मा बन्धे गृह्णीध्वम् ॥५॥

**अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम्।**
**त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः॥ २.०२९.०६**

यजत्राः- पूज्याः। अद्य- इदानीम्। अर्वाञ्चः- अस्मदभिमुखाः। भवत। भयमानः- भीतः। वः- युष्माकम्। हार्दि- हृदयस्थं छन्दः। व्ययेयम्- प्राप्नुयाम्। देवाः- हे देवताः। वृकस्य- आदातुर्हिंसकस्य। निजुरः- निहननात्। त्राध्वम्- रक्षत। अवपदः कर्तात्- आपत्प्रदात्। त्राध्वम्- रक्षत ॥६॥

Dr. Rangan
WEBOLIM

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः।
मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥ २.०२९.०७

पूर्वं व्याख्यातम् (२.०२७.१७) ॥७॥

Dr. Ranganji

WEBOLIM